श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ एकाधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ एकाधिकशततमः सर्गः ॥

## गन्धर्वानाक्रम्य संहृत्य च तत्र द्वे नगरे निवेश्य द्वाभ्यां पुत्राभ्यां समर्प्य भरतस्य पुनरयोध्यायां निवृत्तिः

श्रुत्वा सेनापतिं प्राप्तं भरतं केकयाधिपः।
युधाजिद् गार्ग्यसहितं परां प्रीतिमुपागमत्॥ **7.101.1** ॥

स निर्ययौ जनौघेन महता केकयाधिपः।
त्वरमाणोऽभिचक्राम गन्धर्वान् कामरूपिणः॥ **7.101.2** ॥

भरतश्च युधाजिच्च समेतौ लघुविक्रमैः।
गन्धर्वनगरं प्राप्तौ सबलौ सपदानुगौ॥ **7.101.3** ॥

श्रुत्वा तु भरतं प्राप्तं गन्धर्वास्ते समागताः।
योद्धुकामा महावीर्या व्यनदंस्ते समन्ततः॥ **7.101.4** ॥

ततः समभवद्युद्धं तुमुलं लोमहर्षणम्।
सप्तरात्रं महाभीमं न चान्यतरयोर्जयः॥ **7.101.5** ॥

खड्गशक्तिधनुर्ग्राहा नद्यः शोणितसंस्रवाः।
नृकलेवरवाहिन्यः प्रवृत्ताः सर्वतोदिशम्॥ **7.101.6** ॥

ततो रामानुजः क्रुद्धः कालस्यास्त्रं सुदारुणम्।
संवर्तं नाम भरतो गन्धर्वेष्वभ्यचोदयत्॥ **7.101.7** ॥

ते बद्धाः कालपाशेन संवर्तेन विदारिताः।
क्षणेनाभिहतास्तेन तिस्रः कोट्यो महात्मना॥ **7.101.8** ॥

तद् युद्धं तादृशं घोरं न स्मरन्ति दिवौकसः।
निमेषान्तरमात्रेण तादृशानां महात्मनाम्॥ **7.101.9** ॥

हतेषु तेषु सर्वेषु भरतः केकयीसुतः।
निवेशयामास तदा समृद्धे द्वे पुरोत्तमे॥ **7.101.10** ॥

तक्षं तक्षशिलायां तु पुष्कलं पुष्कलावते।
गन्धर्वदेशे रुचिरे गान्धारविषये च सः॥ **7.101.11** ॥

धनरत्नौघसङ्कीर्णे काननैरुपशोभिते।
अन्योन्यसङ्घर्षकृते स्पर्धया गुणविस्तरैः॥ **7.101.12** ॥

उभे सुरुचिरप्रख्ये व्यवहारैरकिल्बिषैः।
उद्यानयानसम्पूर्णे सुविभक्तान्तरापणे॥ **7.101.13** ॥

उभे पुरवरे रम्ये विस्तरैरुपशोभिते।
गृहमुख्यैः सुरुचिरैर्विमानैर्बहुभिर्वृते॥ **7.101.14** ॥

शोभिते शोभनीयैश्च देवायतनविस्तरैः।
तालैस्तमालैस्तिलकैर्बकुलैरुपशोभिते॥ **7.101.15** ॥

निवेश्य पञ्चभिर्वर्षैर्भरतो राघवानुजः।
पुनरायान्महाबाहुरयोध्यां केकयीसुतः॥ **7.101.16** ॥

सोऽभिवाद्य महात्मानं साक्षाद्धर्ममिवापरम्।
राघवं भरतः श्रीमान् ब्रह्माणमिव वासवः॥ **7.101.17** ॥

**शशंस च यथावृत्तं गन्धर्ववधमुत्तमम्।**
**निवेशनं च देशस्य श्रुत्वा प्रीतोऽस्य राघवः॥ 7.101.18॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे एकाधिकशततमः सर्गः॥